# Svatmaprakashika

# સ્વાત્મપ્રકાશિકા

## Document Information

Text title : Svatmaprakashika

File name : svatmaprakashika.itx

Category : shankarAchArya

Location : doc_z_misc_shankara

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : Nov. 9, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# સ્વાત્મપ્રકાશિકા

॥ શ્રીઃ ॥

॥ સ્વાત્મપ્રકાશિકા ॥

જગત્કારણમજ્ઞાનમેકમેવ ચિદન્વિતમ્ ।
એક એવ મનઃ સાક્ષી જાનાત્યેવં જગત્ત્રયમ્ ॥ ૧ ॥

વિવેકયુક્તબુદ્ધ્યાહં જાનામ્યાત્માનમદ્વયમ્ ।
તથાપિ બન્ધમોક્ષાદિવ્યવહારઃ પ્રતીયતે ॥ ૨ ॥

વિવર્તોઽપિ પ્રપઞ્ચો મે સત્યવદ્ભાતિ સર્વદા ।
ઇતિ સંશયપાશેન બદ્ધોઽહં છિન્ધિ સંશયમ્ ॥ ૩ ॥

એવં શિષ્યવચઃ શ્રુત્વા ગુરુરાહોત્તરં સ્ફુટમ્ ।
નાજ્ઞાનં ન ચ બુદ્ધિશ્ચ ન જગન્ન ચ સાક્ષિતા ॥ ૪ ॥

ગન્ધમોક્ષાદયઃ સર્વે કૃતાઃ સત્યે'દ્વયે ત્વયિ ।
ભાતીત્યુક્તે જગત્સર્વં સદ્રૂપં બ્રહ્મ તદ્ભવેત્ ॥ ૫ ॥

સર્પાદૌ રજ્જુસત્તેવ બ્રહ્મસત્તૈવ કેવલમ્ ।
પ્રપઞ્ચાધારરૂપેણ વર્તતે તજ્જગન્ન હિ ॥ ૬ ॥

યથેક્ષુમભિસંવ્યાપ્ય શર્કરા વર્તતે તથા ।
આશ્ચર્યબ્રહ્મરૂપેણ ત્વં વ્યાપ્તોઽસિ જગત્ત્રયમ્ ॥ ૭ ॥

મરુભૂમૌ જલં સર્વં મરુભૂમાત્રમેવ તત્ ।
જગત્ત્રયમિદં સર્વં ચિન્માત્રં સુવિચારતઃ ॥ ૮ ॥

બ્રહ્માદિસ્તમ્બપર્યન્તાઃ પ્રાણિનસ્ત્વયિ કલ્પિતાઃ ।
બુદ્બુદાદિતરઙ્ગાન્તા વિકારાઃ સાગરે યથા ॥ ૯ ॥

તરઙ્ગત્વં ધ્રુવં સિન્ધુર્ન વાઞ્છતિ યથા તથા ।
વિષયાનન્દવાઞ્છા તે મહદાનન્દરૂપતઃ ॥ ૧૦ ॥

પિષ્ટં વ્યાપ્ય ગુડં યદ્વન્માધુર્યં ન હિ વાઞ્છતિ ।
પૂર્ણાનન્દો જગદ્વ્યાપ્ય તદાનન્દં ન વાઞ્છતિ ॥ ૧૧ ॥

દારિદ્ર્યાશા યથા નાસ્તિ સંપન્નસ્ય તથા તવ ।
બ્રહ્માનન્દનિમગ્નસ્ય વિષયાશા ન સંભવેત્ ॥ ૧૨ ॥

વિષં દૃષ્ટ્વામૃતં દૃષ્ટ્વા વિષં ત્યજતિ બુદ્ધિમાન્ ।
આત્માનમપિ દૃષ્ટ્વા ત્વં ત્યજાનાત્માનમાદરાત્ ॥ ૧૩ ॥

ઘટાવભાસકો ભાનુર્ઘટનાશે ન નશ્યતિ ।
દેહાવભાસકઃ સાક્ષી દેહનાશે ન નશ્યતિ ॥ ૧૪ ॥

નિરાકારં જગત્સર્વં નિર્મલં સચ્ચિદાત્મકમ્ ।
દ્વૈતાભાવાત્કથં કસ્માદ્ભયં પૂર્ણસ્ય મે વદ ॥ ૧૫ ॥

બ્રહ્માદિકં જગત્સર્વં ત્વય્યાનન્દે પ્રકલ્પિતમ્ ।
ત્વય્યેવ લીનં જગત્ત્વં કથં લીયસે વદ ॥ ૧૬ ॥

ન હિ પ્રપઞ્ચો ન હિ ભૂતજાતં
ન ચેન્દ્રિયં પ્રાણગણો ન દેહઃ ।
ન બુદ્ધિચિત્તં ન મનો ન કર્તા
બ્રહ્મૈવ સત્યં પરમાત્મરૂપમ્ ॥ ૧૭ ॥

સર્વં સુખં વિદ્ધિ સુદુઃખનાશા-
ત્સર્વં ચ સદ્રૂપમસત્યનાશાત્ ।
ચિદ્રૂપમેવ પ્રતિભાનયુક્તં
તસ્માદખણ્ડં પરમાત્મરૂપમ્ ॥ ૧૮ ॥

ચિદેવ દેહસ્તુ ચિદેવ લોકા-
શ્ચિદેવ ભૂતાનિ ચિદિન્દ્રિયાણિ ।
કર્તા ચિદન્તઃકરણં ચિદેવ
ચિદેવ સત્યં પરમાર્થરૂપમ્ ॥ ૧૯ ॥

ન મે બન્ધો ન મે મુક્તિર્ન મે શાસ્ત્રં ન મે ગુરુઃ ।
માયામાત્રવિલાસો હિ માયાતીતોઽહમદ્વયઃ ॥ ૨૦ ॥

રાજ્યં કરોતુ વિજ્ઞાની ભિક્ષામટતુ નિર્ભયઃ ।
દોષૈર્ન લિપ્યતે શુદ્ધઃ પદ્મપત્રમિવામ્ભસા ॥ ૨૧ ॥

પુણ્યાનિ પાપકર્માણિ સ્વપ્નગાનિ ન જાગ્રતિ।
એવં જાગ્રત્પુણ્યપાપકર્માણિ ન હિ મે પ્રભોઃ॥ ૨૨॥

કાયઃ કરોતુ કર્માણિ વૃથા વાગુચ્યતામિહ।
રાજ્યં ધ્યાયતુ વા બુદ્ધિઃ પૂર્ણસ્ય મમ કા ક્ષતિઃ॥ ૨૩॥

પ્રાણાશ્ચરન્તુ તદ્ધર્મૈઃ કામૈર્વા હન્યતાં મનઃ।
આનન્દામૃતપૂર્ણસ્ય મમ દુઃખં કથં ભવેત્॥ ૨૪॥

આનન્દામ્બુધિમગ્નોઽસૌ દેહી તત્ર ન દૃશ્યતે।
લવણં જલમધ્યસ્થં યથા તત્ર લયં ગતમ્॥ ૨૫॥

ઇન્દ્રિયાણિ મનઃ પ્રાણા અહંકારઃ પરસ્પરમ્।
જાડ્યસંગતિમુત્સૃજ્ય મગ્ના મયિ ચિદર્ણવે॥ ૨૬॥

આત્માનમઞ્જસા વેદ્મિ ત્વજ્ઞાનં પ્રપલાયિતમ્।
કર્તૃત્વમદ્ય મે નષ્ટં કર્તવ્યં વાપિ ન ક્વચિત્॥ ૨૭॥

ચિદમૃતસુખરાશૌ ચિત્તફેનં વિલીનં
ક્ષયમધિગત એવ વૃત્તિચઞ્ચત્તરઙ્ગઃ।
સ્તિમિતસુખસમુદ્રો નિર્વિચેષ્ટઃ સુપૂર્ણઃ
કથમિહ મમ દુખં સર્વદૈકોઽહમસ્મિ॥ ૨૮॥

આનન્દરૂપોઽહમખણ્ડબોધઃ
પરાત્પરોઽહં ઘનચિત્પ્રકાશઃ।
મેઘા યથા વ્યોમ ન ચ સ્પૃશન્તિ
સંસારદુઃખાનિ ન માં સ્પૃશન્તિ॥ ૨૯॥

અસ્થિમાંસપુરીષાન્ત્રચર્મલોમસમન્વિતઃ।
અન્નાદઃ સ્થૂલદેહઃ સ્યાદતોઽહં શુદ્ધચિદ્ઘનઃ॥ ૩૦॥

સ્થૂલદેહાશ્રિતા એતે સ્થૂલાદ્ભિન્નસ્ય મે ન હિ।
લિઙ્ગં જડાત્મકં નાહં ચિત્સ્વરૂપોઽહમદ્વયઃ॥ ૩૧॥

ક્ષુત્પિપાસાન્ધ્યબાધિર્યકામક્રોધાદયોઽખિલાઃ।
લિઙ્ગદેહાશ્રિતા હ્યેતે નૈવાલિઙ્ગસ્ય મે વિભોઃ॥ ૩૨॥

અનાદ્યજ્ઞાનમેવાત્ર કારણં દેહમુચ્યતે।

નાહં કારણદેહોઽપિ સ્વપ્રકાશો નિરઞ્જનઃ ॥ ૩૩ ॥

જડત્વપ્રિયમોદત્વધર્માઃ કારણદેહગાઃ ।
ન સન્તિ મમ નિત્યસ્ય નિર્વિકારસ્વરૂપિણઃ ॥ ૩૪ ॥

જીવાદ્ભિન્નઃ પરેશોઽસ્તિ પરેશત્વં કુતસ્તવ ।
ઇત્યજ્ઞજનસંવાદો વિચારઃ ક્રિયતેઽધુના ॥ ૩૫ ॥

અધિષ્ઠાનં ચિદાભાસો બુદ્ધિરેતત્ત્રયં યદા ।
અજ્ઞાનાદેકવદ્ભાતિ જીવ ઇત્યુચ્યતે તદા ॥ ૩૬ ॥

અધિષ્ઠાનં ન જીવઃ સ્યાત્પ્રત્યેકં નિર્વિકારતઃ ।
અવસ્તુત્વાચ્ચિદાભાસો નાસ્તિ તસ્ય ચ જીવતા ॥ ૩૭ ॥

પ્રત્યેકં જીવતા નાસ્તિ બુદ્ધેરપિ જડત્વતઃ ।
જીવ આભાસકૂટસ્થબુદ્ધિત્રયમતો ભવેત્ ॥ ૩૮ ॥

માયાભાસો વિશુદ્ધાત્મા ત્રયમેતન્મહેશ્વરઃ ।
માયાભાસોઽપ્યવસ્તુત્વાત્પ્રત્યેકં નેશ્વરો ભવેત્ ॥ ૩૯ ॥

પૂર્ણત્વાન્નિર્વિકારત્વાદ્વિશુદ્ધત્વાન્મહેશ્વરઃ ।
જડત્વહેતોર્માયાયામીશ્વરત્વં નુ દુર્ઘટમ્ ॥ ૪૦ ॥

તસ્માદેતત્ત્રયં મિથ્યા તદર્થો નેશ્વરો ભવેત્ ।
ઇતિ જીવેશ્વરૌ ભાતઃ સ્વાજ્ઞાનાન્ન હિ વસ્તુતઃ ॥ ૪૧ ॥

ઘટાકાશમઠાકાશૌ મહાકાશે પ્રકલ્પિતૌ ।
એવં મયિ ચિદાકાશે જીવેશૌ પરિકલ્પિતૌ ॥ ૪૨ ॥

માયાતત્કાર્યવિલયે નેશ્વરત્વં ચ જીવતા ।
તતઃ શુદ્ધચિદેવાહં ચિદ્વ્યોમનિરુપાધિતઃ ॥ ૪૩ ॥

સત્યચિદ્ઘનમનન્તમદ્વયં
સર્વદૃશ્યરહિતં નિરામયમ્ ।
યત્પદં વિમલમદ્વયં શિવં
તત્સદાહમિતિ મૌનમાશ્રયે ॥ ૪૪ ॥

પૂર્ણમદ્વયમખણ્ડચેતનં
વિશ્વભેદકલનાદિવર્જિતમ્ ।
અદ્વિતીયપરસંવિદંશકં

તત્સદાહમિતિ મૌનમાશ્રયે ॥ ૪૫ ॥

જન્મમૃત્યુસુખદુઃખવર્જિતં
જાતિનીતિકુલગોત્રદૂરગમ્ ।
ચિદ્વિવર્તજગતોઽસ્ય કારણં
તત્સદાહમિતિ મૌનમાશ્રયે ॥ ૪૬ ॥

ઉલૂકસ્ય યથા ભાનાવન્ધકારઃ પ્રતીયતે ।
સ્વપ્રકાશે પરાનન્દે તમો મૂઢસ્ય ભાસતે ॥ ૪૭ ॥

યથા દૃષ્ટિનિરોધાર્તો સૂર્યો નાસ્તીતિ મન્યતે ।
તથાજ્ઞાનાવૃતો દેહી બ્રહ્મ નાસ્તીતિ મન્યતે ॥ ૪૮ ॥

યથામૃતં વિષાદ્ભિન્નં વિષદોષૈર્ન લિપ્યતે ।
ન સ્પૃશામિ જડાદ્ભિન્નો જડદોષાન્પ્રકાશયન્ ॥ ૪૯ ॥

સ્વલ્પાપિ દીપકણિકા બહુલં નાશયેત્તમઃ ।
સ્વલ્પોઽપિ બોધો મહતીમવિદ્યાં શમયેત્તથા ॥ ૫૦ ॥

ચિદ્રૂપત્વાન્ન મે જાડ્યં સત્યત્વાન્નાનૃતં મમ ।
આનન્દત્વાન્ન મે દુઃખમજ્ઞાનાદ્ભાતિ તત્ત્રયમ્ ॥ ૫૧ ॥

કાલત્રયે યથા સર્પો રજ્જૌ નાસ્તિ તથા મયિ ।
અહંકારાદિ દેહાન્તં જગન્નાસ્ત્યહમદ્વયઃ ॥ ૫૨ ॥

ભાનૌ તમઃપ્રકાશત્વાન્નાઙ્ગીકુર્વન્તિ સજ્જનાઃ ।
તમસ્તત્કાર્યસાક્ષીતિ ભ્રાન્તબુદ્ધિરહો મયિ ॥ ૫૩ ॥

યથા શીતં જલં વહ્નિસંબન્ધાદુષ્ણવદ્ભવેત્ ।
બુદ્ધિતાદાત્મ્યસંબન્ધાત્કર્તૃત્વં વસ્તુતો ન હિ ॥ ૫૪ ॥

જલબિન્દુભિરાકાશં ન સિક્તં ન ચ શુધ્યતિ ।
તથા ગઙ્ગાજલેનાયં ન શુદ્ધો નિત્યશુદ્ધતઃ ॥ ૫૫ ॥

વૃક્ષોત્પન્નફલૈર્વૃક્ષો યથા તૃપ્તિં ન ગચ્છતિ ।
મય્યધ્યસ્તાન્નપાનાદ્યૈસ્તથા તૃપ્તિર્ન વિદ્યતે ॥ ૫૬ ॥

સ્થાણૌ પ્રકલ્પિતશ્ચોરઃ સ સ્થાણુત્વં ન બાધતે ।
સ્વસ્મિન્કલ્પિતજીવશ્ચ સ્વં બાધિતુમશક્યતે ॥ ૫૭ ॥

અજ્ઞાને બુદ્ધિવિલયે નિદ્રા સા ભણ્યતે બુધૈઃ ।

વિલીનાજ્ઞાનતત્કાર્યે મયિ નિદ્રા કથં ભવેત્ ॥ ૫૮ ॥

બુદ્ધેઃ પૂર્ણવિકાસોઽયં જાગરઃ પરિકીર્ત્યતે ।
વિકારાદિવિહીનત્વાજ્જાગરો મે ન વિદ્યતે ॥ ૫૯ ॥

સૂક્ષ્મનાડીષુ સંચારો બુદ્ધેઃ સ્વપ્નઃ પ્રજાયતે ।
સંચારધર્મરહિતે સ્વપ્નો નાસ્તિ તથા મયિ ॥ ૬૦ ॥

પરિપૂર્ણસ્ય નિત્યસ્ય શુદ્ધસ્ય જ્યોતિષો મમ ।
આગન્તુકમલાભાવાત્કિં સ્નાનેન પ્રયોજનમ્ ॥ ૬૧ ॥

દેશાભાવાત્ક્વ ગન્તવ્યં સ્થાનાભાવાત્ક્વ વા સ્થિતિઃ ।
પૂર્ણે મયિ સ્થાનદેશૌ કલ્પિતાવહમદ્વયઃ ॥ ૬૨ ॥

પ્રાણસંચારસંશોષાત્પિપાસા જાયતે ખલુ ।
શોષણાનર્હચિદ્રૂપે મય્યેષા જાયતે કથમ્ ॥ ૬૩ ॥

નાડીષુ પીડ્યમાનાસુ વાય્વગ્નિભ્યાં ભવેત્ક્ષુધા ।
તયોઃ પીડનહેતુત્વાત્સંવિદ્રૂપે કથં મયિ ॥ ૬૪ ॥

શરીરસ્થિતિશૈથિલ્યં શ્વેતલોમસમન્વિતમ્ ।
જરા ભવતિ સા નાસ્તિ નિરંશે મયિ સર્વગે ॥ ૬૫ ॥

યોષિત્ક્રીડા સુખસ્યાન્તર્ગર્વાઢ્યં યૌવનં કિલ ।
આત્માનન્દે પરે પૂર્ણે મયિ નાસ્તિ હિ યૌવનમ્ ॥ ૬૬ ॥

મૂઢબુદ્ધિપરિવ્યાપ્તં દુઃખાનામાલયં સદા ।
બાલ્યં કોપનશીલાન્તં ન મે સુખજલામ્બુધેઃ ॥ ૬૭ ॥

એવં તત્ત્વવિચારાબ્ધૌ નિમગ્નાનાં સદા નૃણામ્ ।
પરમાદ્વૈતવિજ્ઞાનમપરોક્ષં ન સંશયઃ ॥ ૬૮ ॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
સ્વાત્મપ્રકાશિકા સંપૂર્ણા ॥

*Svatmaprakashika*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*